दरत्, [द्] स्त्री, (दृणातीति । दॄ विदारणे + "दृदभसोऽदिः ।" उणां । १ । १२९ । इति अदिः ।) प्रपातः । भयम् । पर्व्वतः । इति मेदिनी । दे, ३० ॥ म्लेच्छजातिः । इति लिङ्गादिसंग्रहे अमरः ॥ (देशविशेषः । यथा, राजतरङ्गिण्याम् । १५७ ।
"दरत्तुरुष्काधिपयोर्यः कोशरविराह्वयोः ।
हिमवद्विन्ध्ययोरासीदार्य्यावर्त्त इवान्तरे ॥")
तट् । तीरम् । इति सिद्धान्तकौमुद्यामुणादि-वृत्तिः ॥

दरदं, क्ली, (दर ईषत् दायति शुध्यतीति । दै + कः ।) हिङ्गुलम् । इति राजनिर्घण्टः ॥ (क्वचित् पुंलिङ्गेऽपि दृश्यते । अस्य पर्य्यायो यथा,—
"रक्तं मर्कटशीर्षञ्च हिङ्गुलं दरदो रसः ॥"
इति वैद्यकरत्नमालायाम् ॥
पर्य्यायान्तरं यथा,—
"हिङ्गुलन्दरदं म्लेच्छं चित्राङ्गञ्चूर्णपारदम् ।
दरदस्त्रिविधः प्रोक्तश्चर्म्मारः शुकतुण्डकः ॥
हंसपादस्तृतीयः स्याद्गुणवानुत्तरोत्तरम् ।
चर्म्मारः शुक्लवर्णः स्यात् सपीतः शुकतुण्डकः ॥
जवाकुसुमसङ्काशो हंसपादो महोत्तमः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"दरदं तण्डुलं कृत्वा न्यूनपात्रके त्रिदिनम् ।
भाव्यं जम्बीररसेनार्द्रकेण वा रसेनैकधा ।
ततश्च जम्बीरवारिणा चार्द्रकेण रसेन परिप्लुतम् ।
कृत्वा स्थालीमध्ये निधाय तदुपरि कठिनीं दृढम् ॥
चाष शरावं तत्र विंशद्वारं जलं देयं उष्णे देयं तथैव तदूर्द्ध्वपातनेन विमलं शिवजः ॥"
"हिङ्गुले हिङ्गुलुर्याति दरदः शुकतुण्डकः ।
रसगन्धकसम्भूतो हिङ्गुलो दैत्यरक्तकः ॥
अम्लवर्गद्रवैः पिष्टा दरदो माहिषेण च ।
दुग्धेन सप्तधा पित्तः शुष्कीभूतो विशुध्यति ॥
अन्यच्च ।
मेषीदुग्धेन दरदमम्लवर्गैर्विभावितम् ।
सप्तवारं प्रयत्नेन शुद्धिमायाति निश्चितम् ॥
अन्यमतम् ।
दरदं दोलिकायन्त्रे पक्वं जम्बीरजैर्द्रवैः ।
सप्तवारमथाम्लैर्भावितं शुद्धिमेति हि ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

दरदः, पुं, (दरं भयं ददातीति । दा + कः ।) देशविशेषः । भयम् । म्लेच्छजातिभेदः । इति शब्दरत्नावली ॥ (अयन्तु पूर्व्वं क्षत्त्रिय आसीत् पश्चात् क्रमशः उपनयनादिक्रियालोपात् शूद्रत्वादिकं प्राप्तः । यदुक्तं मनौ । १० । ४३-४४ ।
"शनकैस्तु क्रियालोपादिमाः क्षत्त्रियजातयः ।
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥
पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा यवनाः शकाः ।
पारदा पह्लवाश्चीनाः किराता दरदाः खशाः ॥")

दरिः, स्त्री, (दॄ + इन् ।) दरी । इति शब्दरत्नावली ॥ (तत्तकाख्यकुलोत्पन्ने सर्पे, पुं । इति महाभारतम् ॥)

दरितः, त्रि, (दरो भयमस्य सञ्जातः । दर + तारकादित्वात् इतच् ।) भीतः । इति हेमचन्द्रः । ३ । २९ ॥

दरिद्रः, पुं, (दरिद्राति दुर्गच्छतीति । दरिद्रा + अच् ।) निर्धनः । तत्पर्य्यायः । निस्वः २ दुर्विधः ३ दीनः ४ दुर्गतः ५ । इत्यमरः । ३।१। ४९ ॥ कीकटः ६ दुस्थः ७ । इति जटाधरः ॥ अस्तमितः ८ । इति दानधर्म्मः । तस्य कारणं यथा,—
"अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च ।
अदत्त्वा हेमधेनूश्च दरिद्रो जायते नरः ॥"
इति पाद्मे भूखण्डम् ॥
"दरिद्रो यस्त्वसन्तुष्टः कृपणो योऽजितेन्द्रियः ॥"
इति श्रीभागवतम् ॥

दरिद्रा, च शु दुर्गत्याम् । इति कविकल्पद्रुमः ॥ (अदां-परं-अकं-सेट् ।) दुर्गतिरकिञ्चनीभावः । च शु, उपर्य्युपरि पश्यन्तः सर्व्व एव दरिद्रति । इति दुर्गादासः ॥

दरिद्रायकः, त्रि, (दरिद्रातीति । दरिद्रा + ण्वुल् ।) दरिद्रः । इति मुग्धबोधम् ॥

दरिद्रितः, त्रि, (दरिद्रा + कर्त्तरि क्तः ।) दरिद्रः । दारिद्र्ययुक्तः ॥

दरिद्रिता, [ऋ] त्रि, (दरिद्रा + तृच् ।) दरिद्रायकः । दरिद्राधातोः कर्त्तरि तृन्प्रत्ययः ॥

दरोदरं, क्ली, (दरो भयं तज्जनकं उदरं यस्य । प्रायशः सर्व्वग्रासकत्वादेवास्य तथात्वम् ।) दुरोदरम् । इत्यमरटीकायां भरतः ॥

दरोदरः, पुं, (दरजनकमुदरं यस्य ।) दुरोदरः । इत्यमरटीकायां भरतः ॥ (यथा, उणादिसूत्रटीकायां उज्ज्वलदत्तधृतगोवर्द्धनः । ५ । १९ ।
"आश्रित्य दुर्गं गिरिकन्दरोदरं
क्रीड़त्यसुष्मिन् सततं दरोदरम् ॥")

दर्द्दरः, पुं, पर्व्वतः । (यथा, रामायणे । २ । ६१ । २४ ।
"मलयं दर्द्दरञ्चैव ततः स्वेदगुदो निजः ॥"
क्वचित् दर्द्दुरोऽपि पाठः ॥) ईषद्भग्नभाजने, त्रि । इति मेदिनी । रे, १६६ ॥

दर्द्दराम्रः, पुं, आम्रविशेषः । तत्पर्य्यायः । मीनाम्रेषः २ । इति शब्दमाला ॥

दर्द्दरीकं, क्ली, (दारयतीव कर्णौ । दॄ + णिच् + "पर्फरीकादयश्च ।" उणां । ४ । २० । इति ईकन्प्रत्ययेन साधुः ।) वाद्यम् । इत्युणादिकोषः ॥

दर्द्दरीकः, पुं, (दारयतीव कर्णौ इति । दॄ + णिच् + "पर्फरीकादयश्च ।" उणां । ४ । २० । इति ईकन्प्रत्ययेन साधुः ।) मेघः । वाद्यभेदः । भेकः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

दर्द्दुरं, क्ली, ग्रामजालम् । इति मेदिनी । रे, १६७ ॥

दर्द्दुरः, पुं, (दृणाति कर्णौ शब्देनेति । दॄ + "मद्गुरदर्द्दुरौ ।" उणां । १ । ४१ । इति उरच् प्रत्ययेन निपातनात् साधुः ।) भेकः । इत्यमरः । १ । १० । २४ ॥ (यथा,—
"भद्रं कृतं कृतं मौनं कोकिलैर्जलदागमे ।
दर्द्दुरा यत्र वक्तारस्तत्र मौनं हि शोभनम् ॥"
इत्युद्भटः ॥)
मेघः । वाद्यभाण्डभेदः । पर्व्वतविशेषः । इति मेदिनी । रे, १६७ ॥ (यथा, रघौ । ४ । ५१ ।
"स निर्विश्य यथाकामं तटेष्वालीनचन्दनौ ।
स्तनाविव दिशस्तस्याः शैलौ मलयदर्द्दुरौ ॥")
राक्षसः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (अभ्रकधातुभेदः । यथा, भावप्रकाशे ।
"पिनाकं दर्द्दुरं नागं वज्रञ्चेति चतुर्व्विधम् ॥"
"दर्द्दुरं त्वग्निनिक्षिप्तं कुरुते दर्द्दुरध्वनिम् ।
गोलकान् बहुशः कृत्वा स स्यान्मृत्युप्रदायकः ॥")

दर्द्दुरा, स्त्री, (दृणाति दारयति वा असुरानिति । दॄ + उरच् प्रत्ययेन निपातनात् साधुः । ततष्टाप् ।) चण्डिका । इति मेदिनी । रे, १६७ ॥

दर्द्रूः, पुं, (दरिद्राति दुर्गच्छत्यङ्गमनेनेति । दरिद्रा + "दरिद्रातेर्यालोपः ।" उणां ।१।६०। इति ऊः । रकारेकारयकाराणां लोपश्च ।) दद्रुरोगः । इति शब्दरत्नावली ॥

दर्द्रुः, पुं, (दरिद्रा + बाहुलकात् उः । यालोपश्च ।) दद्रुरोगः । इत्युणादिकोषः ॥

दर्द्रुघ्नः, पुं. (दर्द्रुं हन्तीति । दर्द्रु + हन् + टक् ।) चक्रमर्द्दकः । इति शब्दरत्नावली ॥

दर्द्रुणः, त्रि, (दर्द्रुरस्यास्तीति । दर्द्रु + "लोमादिपामादिपिच्छादिभ्यः शनेलचः ।" ५।२।१०० । इति पामादिषु पाठात् नः । ततो णत्वञ्च ।) दद्रुरोगी । इत्यमरटीकायां भरतः ॥

दर्द्रूः, पुं, (दरिद्रा + ऊः । यालोपश्च ।) दद्रुरोगः । इत्युणादिकोषः ॥

दर्द्रूणः, त्रि, (दर्द्रूरस्यास्तीति । दर्द्रू + नः ।) दद्रुरोगी । इत्यमरटीकायां भरतः ॥

दर्द्रूरोगी, [न्] त्रि, (दर्द्रूरोगोऽस्यास्तीति । दर्द्रूरोग + इनिः ।) दद्रुरोगी । इत्यमरटीकायां भरतः ॥

दर्पः, पुं, (दृप्यते इति । दृप् + भावे घञ् ।) उच्छृङ्खलत्वम् । इति नीलकण्ठः । कस्तूरी । इति मेदिनी । पे, ७ ॥ उष्मा । इति त्रिकाण्डशेषः ॥ अहङ्कृतिः । तत्पर्य्यायः । गर्व्वः २ अहङ्कारः ३ अवलिप्तता ४ अभिमानः ५ ममता ६ मानः ७ चित्तोन्नतिः ८ स्मयः ९ । इति हेमचन्द्रः । २ । २३१ ॥ * ॥
"अहङ्कारश्च सर्व्वेषां पापबीजममङ्गलम् ।
ब्रह्माण्डेषु च सर्व्वेषां गर्व्वपर्य्यन्तमुन्नतिः ॥
येषां येषां भवेद्दर्पो ब्रह्माण्डेषु परात्परे ।
विज्ञाय सर्व्वं सर्व्वात्मा तेषां शास्ताहमेव च ॥
क्षुद्राणां महताञ्चैव येषां गर्व्वो भवेत् प्रिये ! ।
एवंविधमहं तेषां चूर्णीभूतं करोमि च ॥
चकार दर्पभङ्गञ्च महाविष्णोः पुरा विभुः ।
ब्रह्मणश्च तथा विष्णोः शेषस्य च शिवस्य च ॥
धर्म्मस्य च यमस्यापि शाम्बस्य चन्द्रसूर्य्ययोः ।
गरुड़स्य च वह्नेश्च गुरोर्दूर्व्वाससस्तथा ॥
दौवारिकस्य भक्तस्य जयस्य विजयस्य च ।